Sinh vayagrah Panchlakshani;

25422.

मा० ल० श्रीगणेशायनमः अनुमानप्रामाण्यंनिरूप्यव्याप्तिस्वरूपनिरूपणमारभते॥ नन्वित्यादिना॥ अनुमितिरित्यस्यानुमाननिष्ठप्रामाण्यानुमिति
१ रित्यर्थः व्याप्तिज्ञानइत्यत्र चविषयत्वसप्तम्यर्थः तथाचानुमाननिष्ठप्रामाण्यानुमितिहेतुव्याप्तिज्ञानविषयीभूताव्याप्तिः केत्यर्थः अनुमाननिष्ठ
प्रामाण्यानुमितिहेत्वित्यनेनव्याप्तेरनुमानप्रामाण्योपपादकत्वकथनादनुमानप्रामाण्यनिरूपणानन्तरंव्याप्तिनिरूपणेउपोद्घातएवसंगतिरितिसू
चितमित्याहुः उपपादकत्वंचात्रज्ञापकत्वंकेचित्तु अनुमितिपदमनुमितिनिष्ठेतरभेदानुमितिपरम् तथाचानुमितिनिष्ठभेदानुमितौयोहेतुःप्रागु
क्तव्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वरूपः तद्घटकंयद्व्याप्तिज्ञानंतदंशेविशेषणीभूताव्याप्तिः केत्यर्थः घटकत्वार्थकसप्तमीतत्पुरुषसमासा
त् तथाचप्रागुक्तानुमितिलक्षणेउपोद्घातएवसंगतिरत्रसूचितेत्याहुः॥ ननावदिति। अव्यभिचरितत्वमव्यभिचरितत्वशब्दप्रतिपाद्यंतत्र हेतुमाह

**श्रीगणेशायनमः नन्वनुमितिहेतुव्याप्तिज्ञानेकाव्याप्तिः न तावदव्यभिचरितत्वम् तद्धि न साध्याभाववदवृत्तित्वम् ॥**

। तद्धीति हि यस्मात्तदव्यभिचरितत्वंनेतिसर्वत्रसंबध्यते तथाचव्याप्तिर्यतः साध्याभाववदवृत्तित्वादिरूपाभिचारितत्वशब्दप्रतिपाद्यस्वरू
पात् अतोऽव्यभिचरितत्वशब्दप्रतिपाद्यस्वरूपानेत्यर्थः पर्य्यवसितः। विशेषाभावकूटस्यसामान्याभावहेतुताप्रसिद्धेवेतितत्रद्वयोपादानम
नर्थकमितिविभावनीयम्। साध्याभाववदवृत्तित्वमिति। वृत्तंवृत्तिभावेनिष्ठाप्रत्ययात्॥ वृत्तस्याभावोऽवृत्तं वृत्त्यभावइतियावत् साध्याभावव
तोऽवृत्तंसाध्याभाववदवृत्तं तद्यत्रास्तितत्साध्याभाववदवृत्ति मत्वर्थीयेनप्रत्ययात् तस्यभावःसाध्याभाववदवृत्तित्वम्। तथाचसाध्याभाव रामः
वदवृत्त्यभाववत्त्वंइतिफलितोऽर्थइतिप्रांचः तदसत् तत्कर्मधारयान्मत्वर्थीयोबहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरइत्यनुशासनविरोधात्। तत्रकर्म १

धारयपदस्यबहुव्रीहीतरसमासपरत्वात् तच्चागुणवत्त्वमितिसाधर्म्यव्याख्यानावसरेगुणप्रकाशरहस्येदीधितिरहस्येचस्फुटम् अव्ययीभा
वसमासोत्तरपदार्थेनसमंतत्समासानिविष्टपदार्थान्तरान्वयस्याव्युत्पन्नत्वात्।भूतलोपकुम्भं भूतलाघटमित्यादौचभूतलवृत्तिघटसमीप
तदत्यन्ताभावयोरप्रतीतेः एतेनवृत्तेरभावोऽवृत्तीत्यव्ययीभावानन्तरं साध्याभाववतोवृत्तिर्यत्रेतिबहुव्रीहिरित्यादिप्रत्युक्तम्। वृत्तौसाध्याभावव
तोऽन्वयानुपपत्तेः अव्ययीभावसमासस्यापि अव्ययतयातेनसमंसमासान्तरासम्भवाच्चनञ्उपाध्यादिरूपाव्ययविशेषाणामेवसमस्यमानत्वे
नपरिगणितत्वात्। वस्तुतस्तुसाध्याभाववतोनवृत्तिर्यस्मेतित्रिपदव्यधिकरणबहुव्रीह्युत्तरंत्वप्रत्ययः साध्याभाववतइत्यत्रनिरूपितत्वंष
ष्ठ्यर्थः अन्वयश्चास्यवृत्तौ। तथाचसाध्याभावाधिकरणनिरूपितवृत्त्यभाववत्त्वमव्यभिचरितत्वमितिफलितम् नचव्यधिकरणबहुव्रीहिश्च
नसर्वत्रसाधुरितिवाच्यम् अयंहेतुःसाध्याभाववदवृत्तिरित्यादौव्यधिकरणबहुव्रीहिंविनागत्यन्तराभावेनात्रापिव्यधिकरणबहुव्रीहेस्सा
धुत्वात् साध्याभावाधिकरणवृत्त्यभावश्चतादृशवृत्तित्वसामान्याभावोबोध्यः तेनधूमवान्वह्नेरित्यादौधूमाभाववज्जलह्रदादिवृत्त्यभावस्य
धूमाभाववद्वृत्तित्वजलत्वोभयत्वाद्यवच्छिन्नाभावस्यचवह्नौसत्त्वेपिनातिव्याप्तिः साध्याभाववद्वृत्तिश्चहेतुतावच्छेदकसम्बंधेनविवक्षणी
या तेनवह्न्यभाववतिधूमावयवेजलह्रदादौसमवायकालिकविशेषणतादिनाधूमस्यवृत्तावपिनक्षतिः साध्याभावःसाध्यतावच्छेदकसंब
न्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकोबोध्यः तेनवह्निमान्धूमादित्यादौसमवायादिसम्बन्धेनवह्निसामान्याभाववतिसं
योगसंबन्धेनतत्तद्वह्नित्ववह्निजलोभयत्वावच्छिन्नाभाववतिचपर्वतादौसंयोगेनधूमस्यवृत्तावपिनक्षतिः ननुतथापिगुणत्ववान्ज्ञानत्वा
त्। सत्तावान्जातेरित्यादौविषयित्वाव्याप्यत्वादिसम्बन्धेनतादृशसाध्याभाववतिज्ञानादौज्ञानत्वजात्यादेर्वर्तमानत्वादव्याप्तिः नचसाध्या

म॰ २ भावाधिकरणत्वमभावीयविशेषणताविशेषेणविवक्षितमितिवाच्यम्। तथासति घटत्वात्यन्ताभाववान्घटान्योन्याभाववान्पटत्वादित्या
दौसाध्याभावस्य घटत्वादेर्विशेषणताविशेषत्वसम्बन्धेनाधिकरणाप्रसिद्ध्याऽव्याप्तिरिति चेन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियो
गिताकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनसाध्याभावाधिकरणत्वस्यविवक्षितत्वात्॥ वृत्त्यन्तं प्रतियोगितावि
शेषणं। तादृशसंबंधश्च वन्हिमान् धूमादित्यादिभावसाध्यकस्थलेविशेषणताविशेष एव। घटत्वात्यन्ताभाववान्पटत्वादित्यादि अभावसा
ध्यकस्थलेतुसमवायादिरेव॥ समवायविषयित्वादिसम्बन्धेनप्रमेयादिसाध्यकेज्ञानत्वादिहेतौसाध्यतावच्छेदकसमवायादिसम्बन्धावच्छि
न्नप्रमेयाद्यभावस्यकालिकादिसम्बन्धेनयोऽभावः सोपिप्रमेयतयासाध्यान्तर्गतः तदीयप्रतियोगितावच्छेदककालिकादिसंबंधेनसाध्याभा
वाधिकरणेज्ञानत्वादेर्वृत्तेरव्याप्तिवारणायसामान्यपदोपादानम्। साध्यसामान्यीयत्वंच यावत्साध्यनिरूपितत्वंस्वानिरूपकसाध्यकभिन्नत्वमि
तियावत्। अस्यैकोक्तिमात्रपरतयागौरवस्यादोषत्वात् कारणतावच्छेदकेचभावसाध्यकस्थले अभावीयविशेषणताविशेषेणसाध्याभावाधि
करणत्वमभावसाध्यकस्थलेचयथायथंसमवायादिसंबंधेनसाध्याभावाधिकरणत्वमुपादेयम्॥ साध्यसाधनभेदेनकार्यकारणभावभेदात्
नचतथापिघटान्योन्याभाववान्पटत्वादित्यादावन्योन्याभावसाध्यकस्थलेघटत्वादिरूपेसाध्याभावेनसाध्यप्रतियोगित्वंनवासमवायादिसंबं
धस्तदवच्छेदकः तादात्म्यस्यैवतदवच्छेदकत्वादित्यव्याप्तिस्तदवस्थेतिवाच्यम्। अत्यन्ताभावाभावस्यप्रतियोगिरूपत्वेनघटभेदस्यघटभेदात्य
न्ताभावत्वावच्छिन्नाभावरूपतयाघटभेदात्यन्ताभावरूपस्यप्रतियोगितावच्छेदकीभूतघटत्वस्यापिसमवायसम्बन्धेनघटभेदप्रतियोगि राम॰
त्वात्॥ नचान्यत्रात्यन्ताभावाभावस्यप्रतियोगिरूपत्वेपिघटभेदात्यन्ताभावाभावोनघटादिभेदरूपः। किन्तुप्रतियोगितावच्छेदकीभूतघट। २

... ADVANCED STUDY
Acc. No. 25422
Date 9-8-68

# अथसिंहव्याघ्रसहितामाथुरीपंचलक्षणीप्रारभ्यते

म. गितावच्छेदकत्वात् यद्वा साध्यतावच्छेदकसंबन्धावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीयनिरुक्तप्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छेद
३ कसंबंधेनैव साध्याभावाधिकरणत्वं विवक्षणीयम्। वृत्त्यन्तमन्यतरविशेषणम् एवं च घटान्योन्याभाववान् पटत्वादित्यादौ साध्याभावस्य घटत्वा
देः साध्यप्रतियोगित्वविरहेऽपि न क्षतिः तादृशान्यतरस्य प्रतियोगितावच्छेदकत्वस्यैव तत्र सत्त्वात् न च तथापि कपिसंयोगी एतद्वृक्षत्वादित्या
द्यव्याप्यवृत्तिसाध्यके सद्धेतावव्याप्तिरिति वाच्यम्। निरुक्तसाध्याभाववत्त्वविशिष्टनिरूपिताया निरुक्तसंसर्गकनिरवच्छिन्नाधिकरणताया तदाश्रया
वृत्तित्वस्य विवक्षितत्वात्। गुणकर्मान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ सत्तात्मकसाध्याभावाधिकरणत्वस्य गुणादिवृत्तित्वेऽपि साध्याभा
ववत्त्वविशिष्टनिरूपिताधिकरणत्वस्य गुणाद्यवृत्तित्वान्नाव्याप्तिः न चैवं कपिसंयोगाभाववान् सत्त्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वा
प्रसिध्याऽव्याप्तिरिति वाच्यम्। केवलान्वयिन्यभावादित्यनेन ग्रन्थकृतैवास्य दोषस्य वक्ष्यमाणत्वात् न च तथापि कपिसंयोगिभिन्नं गुणत्वादि
त्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वाऽप्रसिध्याऽव्याप्तिः अन्योन्याभावस्याव्याप्यवृत्तितानियमवादिनये तस्य केवलान्वय्यन्तर्गतत्वा
दिति वाच्यम् अन्योन्याभावस्याव्याप्यवृत्तितानियमवादिनये अन्योन्याभावात्यन्ताभावस्य प्रतियोगितावच्छेदकस्वरूपत्वेऽपि अव्याप्यवृत्तिम
दन्योन्याभावाभावस्याव्याप्यवृत्तिस्वरूपस्यातिरिक्तस्याभ्युपगमात् तच्चाग्रे स्फुटीभविष्यति। ननु तथापि समवायादिना गगनादिहेतुके इदं वह्निमद्गग
नादित्यादावतिव्याप्तिः वह्न्यभाववति हेतुतावच्छेदकसमवायादिसम्बन्धेन गगनादेरवृत्तेः न च तत्र लक्ष्यमेव हेतुतावच्छेदकसंबन्धेन पक्षधर्मत्वा
भावाच्चासद्धेतुत्वव्यवहार इति वाच्यम्। तत्रापि व्याप्तिभ्रमेणैवानुमितेरनुभवसिद्धत्वादन्यथा धूमवान् वह्नेरित्यादेरपि लक्ष्यस्य सुवचत्वात् एवंद्र एमः
व्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावप्यव्याप्त्यापत्तिः विशिष्टसत्त्वस्य केवलसत्तानतिरेकितया द्रव्यत्वाभाववत्यपि गुणादौ तस्य वृत्तेः गुणेगु ३

णकर्मान्यत्वविशिष्टसत्वेनेतिप्रतीतेस्सर्वसिद्धत्वात् सत्तावान् द्रव्यत्वादित्यादावव्याप्तिश्च सत्ताभाववतिसामान्यादौहेतुतावच्छेदकसमवाय
सम्बन्धेनवृत्तेरप्रसिद्धेरितिचेन्नहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणताप्रतियोगिकहेतुतावच्छेदकसंबन्धावच्छिन्नाधेयतानिरूपितवि
शेषणताविशेषसंबंधेननिरुक्तसाध्याभाववत्वविशिष्टनिरूपितनिरुक्तसंसर्गकनिरवच्छिन्नाधिकरणताश्रयवृत्तित्वसामान्याभावस्यविवक्षित
त्वात् वृत्तिश्चनहेतुतावच्छेदकसंबंधेनविवक्षणीया अस्तिचसत्तावान्द्रव्यत्वादित्यादौसत्ताभावाधिकरणतावद्वृत्तेर्हेतुतावच्छेदकसमवाय
सम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसम्बन्धेनसामान्याभावोद्रव्यत्वादौहेतुतावच्छेदकसमवायसंबंधावच्छिन्नाधेयतानिरूपि
तविशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावाधिकरणतावद्वृत्तित्वाभावस्यव्यधिकरणसम्बन्धावच्छिन्नाभाववतयासंयोगसं
बंधावच्छिन्नगुणाभावादेरिवकेवलान्वयित्वात्। द्रव्यंसत्वादित्यादौचद्रव्यत्वाभावाधिकरणगुणादिवृत्तित्वस्यैवसमवायावच्छिन्नाधेयतानिरू
पितविशेषणतासम्बन्धेनसत्तायांसत्वान्नातिव्याप्तिः द्रव्यंविशिष्टसत्वादित्यादावव्याप्तेर्वारणायप्रतियोगिकान्तमाधेयताविशेषणम्। वस्तुतस्त्वे
तल्लक्षणकर्तृनये विशिष्टसत्वंविशिष्टनिरूपिताधारता — — संबंधेनैवद्रव्यत्वव्याप्यंनतुसमवायसंबंधेनतथाचप्रतियोगिकान्तमाधेयताविशे
षणमनुपादेयमेव॥ नतुपादानेहेतुतावच्छेदकभेदेनकार्य्यकारणभावभेदापत्तेः हेतुतावच्छेदकसंबंधित्वेसतीत्यनेनापिविशेषणीयत्वाद्वह्नि
मान्गगनादित्यादौनातिव्याप्तिः ननुतथाप्युभयत्वमुभयत्रैवपर्याप्तंन — — त्वेकत्रेतिसिद्धान्तादेर्घटत्ववान्घटपटोभयत्वादित्यादौपर्याप्त्या
त्मकसंबंधेनोभयत्वहेतुकेऽतिव्याप्तिः घटत्वाभाववतिहेतुतावच्छेदकसंबंधेनहेतोरवृत्तेः घटोनघटपटोभयमितिवत्पटेनघटपटोभयमितिप्र
तीतेरितिचेन्नतादृशसिद्धान्तादेर्हेतुतावच्छेदकसंबन्धेनसाध्यसमानाधिकरणत्वेसतीत्यनेनैवविशेषणीयत्वात् अतएवोक्तंनिविशतांवा।

वृत्तिमत्वंसाध्यसमानाधिकरणत्वंवेतिकेवलान्वयिग्रंथेदीधितिकृताकेचित्तुनिरुक्तसाध्याभाववत्वविशिष्टनिरूपितायाविशेषणतासम्बन्धे।
नयथोक्तसम्बन्धेनवानिरवच्छिन्नाधिकरणतातदाश्रयव्यक्त्यवर्त्तमानंहेतुतावच्छेदकंसंवन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसामान्यंत
द्धर्मवत्वंविवक्षितम्। धूमवान्वन्हेरित्यादौपर्वतादिनिष्ठवन्ह्यधिकरणत्वस्यव्यक्तेधूमाभावाधिकरणावृत्तित्वेपिअयोगोलकनिष्ठवन्ह्यधिकरण
ताव्यक्तेरतथात्वान्नातिव्याप्तिरित्याहुः अन्येतुहेतुतावच्छेदकसंवंधावच्छिन्नहेतुतावच्छेदकावच्छिन्नस्वाधिकरणताश्रयवृत्तियन्निरवच्छि
न्नाधिकरणत्वंतदवृत्तिनिरुक्तसाध्याभाववत्वविशिष्टनिरूपितयथोक्तसम्बन्धावच्छिन्नाधिकरणतात्वकत्वमितिविशेषणविशेष्यभावव्यत्या
सेनात्पर्यस्वपदंहेतुपरं इत्थंचकपिसंयोगाभाववान्सत्वादित्यादौकपिसंयोगिभिन्नंगुणत्वादित्यादावपिनाव्याप्तिरित्याहुरितिसंक्षेपः॥लक्ष

## साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्॥

णान्तरमाह। साध्यवद्भिन्नेति। साध्यवद्भिन्नोयस्साध्याभाववान् तदवृत्तित्वमित्यर्थः कपिसंयोगीएतद्वृक्षत्वादित्याद्यव्याप्यवृत्तिसाध्यके ऽ।
व्याप्तिवारणायसाध्यवद्भिन्नेतिसाध्याभाववतोविशेषणमितिप्रांचः तदसत् साध्याभाववदित्यस्यव्यर्थत्वापत्तेःसाध्यवद्भिन्नावृत्तित्वमित्यस्यैव
सम्यक्त्वात्। नव्यास्तुसाध्यवद्भिन्नेयःसाध्याभावस्तद्वदवृत्तित्वमितिसप्तमीतत्पुरुषोत्तरंमतुप्प्रत्ययः। तथाचसाध्यवद्भिन्नवृत्तिर्यः साध्याभा
वस्तद्वदवृत्तित्वमित्यर्थः एवंच। साध्यवद्भिन्नवृत्तीत्यनुक्तौसंयोगीद्रव्यत्वादित्यादावव्याप्तिः साध्याभाववतिद्रव्येद्रव्यत्वस्यवृत्तेः तदुपादानेच राम: ४
संयोगवद्भिन्नवृत्तिसंयोगाभावगुणादिवृत्तिसंयोगाभावएवअधिकरणभेदेनाभावभेदात् तद्वद्वृत्तित्वाभावान्नाव्याप्तिः नचतथापिसाध्यव

त्वात्यन्ताभावरूप एवेति सिद्धान्त इति वाच्यम् यथा हि घटत्वावच्छिन्नघटवत्ताग्रहे घटात्यन्ताभावाग्रहाद्घटात्यन्ताभावाभावव्यवहाराच्च घटा
त्यन्ताभावाभावो घटरूपस्तथा घटभेदवत्ताग्रहे घटभेदात्यन्ताभावाग्रहान् घटभेदात्यन्ताभावाभावव्यवहाराच्च घटभेद एव तदत्यन्ताभावत्वावच्छि
न्नप्रतियोगिताकाभाव इति तादृशसिद्धान्तो न युक्तिसहः विनिगमकाभावेनापि घटत्वत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववद्घटभेदस्यापि घटभेदा
त्यन्ताभावप्रतियोगिनि घटभेदे तल्लक्षणाव्याप्त्यापत्तेः न वान्योन्याभावप्रतियोगितावच्छेदकेन लक्षणस्यातिव्याप्त्यापत्तिः इष्टापत्तेः न चैवं घटत्व
त्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्यापि घटभेदस्वरूपत्वापत्तिरिति वाच्यम्। तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावस्यैव
तत्स्वरूपत्वाभ्युपगमात् तद्वत्ताग्रहे तादृशतदत्यन्ताभावाभावस्यैव व्यवहारात् उपाध्यायैर्घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभाव।
स्यापि घटभेदस्वरूपत्वाभ्युपगमाच्च न चैवं साध्यसामान्यीयप्रतियोगितावच्छेदकसंबंधेनैव साध्याभावाधिकरणत्वं विवक्षणीयं किं साध्यतावच्छे
दकसम्बन्धावच्छिन्नसाध्याभाववृत्तित्वस्य प्रतियोगिताविशेषणत्वेनेति वाच्यम् कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभाव।
स्य विशेषणताविशेषेण साध्यत्वे आत्मत्वादिहेतावव्याप्त्यापत्तेः कालिकसंबंधावच्छिन्नसाध्याभावस्य विशेषणताविशेषसंबंधेन योऽभावस्त।
स्यापि साध्यरूपतया यया कालिकसम्बन्धवद्विशेषणताविशेषोपि साध्यीयप्रतियोगितावच्छेदकसंबन्धस्तेन संबन्धेनात्मत्वप्रकारकप्रमाविशेष्य
त्वरूपसाध्याभाववत्यात्मनि हेतोरात्मत्वस्य वृत्तेः प्रतियोगितावच्छेदकवत्प्रतियोग्यपि अन्योन्याभावाभावस्तेन न तादात्म्यसंबंधेन साध्यतायां साध्य
तावच्छेदकसंबन्धावच्छिन्नसाध्याभाववृत्तिसाध्यीयप्रतियोगित्वस्याप्रसिद्धिः इत्थं चात्यन्ताभावत्वनिरूपितत्वेनापि साध्यसामान्यीयप्रति।
योगिताविशेषणीयाऽन्यथा घटान्योन्याभाववान् घटत्वादित्यादावव्याप्त्यापत्तेः तादात्म्यसम्बन्धस्यापि निरुक्तसाध्याभाववृत्तिसाध्यीयप्रतियो।

म· साध्यवत्प्रतियोगिकान्योन्याभावेति· हेतौ साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणावृत्तित्वाभाव इत्यर्थः। अन्योन्याभावस्य प्रतियोग्यवृ
५ त्तित्वेन विशेषणीयः तेन साध्यवतो व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्याभाववति हेतोर्वृत्तावपि नासंभवः नन्वेवमपि नानाधि
करणसाध्यके वन्हिमान्धूमादित्यादौ साध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्याभाववति हेतोर्वृत्तेरव्याप्तिर्दुर्वारा प्रति
योग्यवृत्तित्वमपहाय साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावविवक्षणे तु पंचमेन सह पौनरुक्त्यमिति चेन्न। वक्ष्यमाणकेवलान्वय्य
व्याप्तिवदस्याप्यत्र दोषत्वात्। न च तथापि साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्यैवेन लक्षणघटकत्वे वक्ष्यमाणकेवलान्वय्यव्याप्तिरत्रासं

**साध्यवत्प्रतियोगिताकान्योन्याभावासामानाधिकरण्यं सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम्॥ ॥**

गता केवलान्वयिसाध्यकेपि साध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नान्योन्याभावस्य प्रसिद्धत्वादिति वाच्यम्। तत्रापि तादृशान्योन्याभाव
स्य प्रसिद्धत्वेपि तद्वति हेतोर्वृत्तेरेवाव्याप्तेर्दुर्वारत्वात्। यद्वा साध्यवत्प्रतियोगिकान्योन्याभाभावपदेन साध्यवत्त्वावच्छिन्नप्रतियोगिकान्यो।
न्याभाव एव विवक्षितः न चैवं पंचमो भेदः तत्र साध्यत्वावच्छिन्नप्रतियोगिकान्योन्याभाववत्त्वेन प्रवेशात्र तु तादृशाधिकरणत्वेनेति अधिकरण
त्वप्रवेशाप्रवेशाभ्यामेव भेदात् अखण्डाभावघटकतया च नाधिकरणत्वांशस्यात्र वैयर्थ्यमिति न कोपि दोष इति दिक्। सकलेति। साकल्यं साध्या गम:
भावतो विशेषणम् तथा च। यावन्ति साध्याभावाधिकरणानि तन्निष्ठाभावप्रतियोगित्वं हेतोर्व्याप्तिरित्यर्थः धूमाद्यभाववद्ह्रदादिनिष्ठाभावप्रति ५

योगित्वाद्वह्न्यादेरतिव्याप्तिरिति। यावदिति साध्याभाववतो विशेषणम् साध्याभावविशेषणत्वेन ह्रदाद्यवृत्तित्वादिरूपेण योवह्न्यभावस्त
स्यापि सकलमध्यप्रवेशात्तावदधिकरणाप्रसिद्ध्याऽसम्भवापत्तेः। नच द्रव्यं सत्वादित्यादौ द्रव्यत्वाभाववति गुणादौ सत्तादेर्विशिष्टाभावादि
सत्वादतिव्याप्तिरिति वाच्यम् तादृशाभावप्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वस्यैव विवक्षितत्वात्। प्रतियोगिता च हेतुतावच्छेद
कसम्बन्धेन विवक्षणीया। तेन द्रव्यत्वाद्यभाववति गुणादौ सत्वादेः संयोगादिसंबन्धावच्छिन्नाभावसत्वेपि नातिव्याप्तिः साध्याभावस्साध्य
तावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः अन्यथा पर्वतादेरपि वह्न्यादेर्विशिष्टाभावादिसत्वेन सम
वायादिसंबन्धावच्छिन्नवह्न्यादिसामान्याभाववत्वेन च यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभावाद्धूम स्यासम्भवात् नच कपिसंयो
गेन वृक्षसत्वादित्यादौ वृक्षस्यापि तादृशसाध्याभाववत्वेन यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभावादेतद्वृक्षसत्वस्याव्याप्तिरिति वा।
च्यम् किंचिदनवच्छिन्नायास्साध्याभावाधिकरणताया इह विवक्षितत्वात् इत्थं च किंचिदनवच्छिन्नायाः कपिसंयोगाभावाधिकरणताया
गुणादावेव सत्वात्तत्र हेतोरप्यभावसत्वान्नाव्याप्तिः नच कपिसंयोगाभाववान्सत्वादित्यादौ साध्याभावस्य कपिसंयोगादेर्निरवच्छिन्नाधिक
रणत्वाप्रसिद्ध्याऽव्याप्तिरिति वाच्यम् केवलान्वयिन्यभावादित्यनेन ग्रंथकृतैवास्य दोषस्य वक्ष्यमाणत्वात्। नच पृथिवी कपिसंयोगादित्यादौ
पृथिवीत्वाभाववति यावत्येव कपिसंयोगाभावसत्वादव्याप्तिरिति वाच्यम्। तन्निष्ठपदेन तत्र निरवच्छिन्नवृत्तिमत्वस्य विवक्षितत्वात् इत्थं
च पृथिवीत्वाभावाधिकरणे जलादौ यावदन्तर्गतेन निरवच्छिन्नवृत्तिमानभावो न कपिसंयोगाभावः किंतु घटत्वाद्यभाव एव तत्प्रतियोगित्वस्य
हेतावसत्वान्नातिव्याप्तिः नचैवमन्योन्याभावस्याव्याप्यवृत्तितानियमनये द्रव्यत्वाभाववान् संयोगवद्भिन्नत्वादित्यादेरपि सद्धेतुतयाऽव्याप्तिः

म· संयोगवद्भिन्नत्वाभावस्यसंयोगस्यनिरवच्छिन्नवृत्तेरप्रसिद्धेरितिवाच्यम् अन्योन्याभावस्याव्याप्यवृत्तितानियमनयेऽन्योन्याभावस्याभावो
६ नप्रतियोगितावच्छेदकरूपः किन्त्वतिरिक्तोव्याप्यवृत्तिरन्यथामूलावच्छेदेनकपिसंयोगिभेदाभावभानानुपपत्तेरितिसंयोगवद्भिन्नत्वाभाव
स्यापिनिरवच्छिन्नवृत्तिमत्त्वात्। वस्तुतस्तुसकलपदमत्राशेषपरंतत्तद्घटत्वाभाववान्पटत्वादित्याद्यैकव्यक्तिपक्षकेसाध्याभावाधिकरणस्यया
वत्त्वाप्रसिद्ध्याऽव्याप्त्यापत्तेः तथाचकिंचिदनवच्छिन्नायानिरुक्तसाध्याभावाधिकरणतायाव्यापकीभूतोयोऽभावःहेतुतावच्छेदकसंबंधा।
वच्छिन्नतत्प्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वंलक्षणार्थः नचसत्तादिसामान्याभावस्यापिप्रमेयत्वादिनानिरुक्तसाध्याभावाधिकर।
णताव्यापकत्वाद्द्रव्यंसत्त्वादित्यादावतिव्याप्तिः तद्वृत्तिनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वंव्यापकत्वमित्युक्तौतुनिर्धूमत्वव्याप्यवान्।

साध्यवदन्यावृत्तित्वम्वाकेवलान्वयिन्यभावात्। इतिचिंतामणौ॥

निर्वह्नित्वादित्यादावव्याप्तिः निर्वह्नित्वाभाववतांवह्निव्यक्तीनांसर्वासामेवचालनीन्यायेननिर्धूमत्वाभावाधिकरणतावन्निष्ठान्योन्याभा
वप्रतियोगितावच्छेदकत्वादितिवाच्यम्। तादृशाधिकरणताव्यापकतावच्छेदकंहेतुतावच्छेदकसंबंधावच्छिन्नयद्धर्मावच्छिन्नाभाव
त्वंतद्धर्मवत्त्वस्यविवक्षितत्वात् व्यापकतावच्छेदकत्वंतुतद्वृत्तिनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वम्वाप्रकृतव्यापकतायांप्रतियोगि।
वैयधिकरण्यस्यनिरवच्छिन्नत्वस्यवाप्रवेशेप्रयोजनविरहात् तेनपृथिवीसंयोगादित्यादौनातिव्याप्तिः कपिसंयोगाभाववत्त्वस्यनि।रुक्तव्या रामः
पकतानवच्छेदकत्वादित्येवपरमार्थः॥४॥ साध्यवदन्येति। अत्रापिप्रथमलक्षणोक्तरीत्याहेतौसाध्यवदन्यवृत्तित्वस्याभाववत्त्यर्थः तादृश ६

ड्डिन्नावृत्तित्वमित्येवास्तु किंसाध्याभाववदित्यनेनेतिवाच्यम्। यथोक्तलक्षणे तस्याप्रवेशेन वैयर्थ्याभावात् तस्यापि लक्षणान्तरत्वात् नच
तथापि साध्यवद्भिन्नवृत्तिर्यस्तद्वृत्तित्वमेवास्तु किंसाध्याभावपदेनेतिवाच्यम्। तादृशद्रव्यत्वादिमद्वृत्तित्वादसंभवापत्तेः साध्याभावत्व।
स्य साध्यपदमप्यनेनैव द्रव्यत्वादेरपि द्रव्यत्वाभावाभावत्वात् भावरूपाभावस्य चाधिकरणभेदेन भेदाभावात्। ननु घटाकाशसंयोगघटत्वान्यत
राभाववान् गगनत्वादित्यत्र घटानधिकरणदेशावच्छेदेन घटाकाशसंयोगाभावस्य गगने सत्त्वात् सद्धेतुत्वादव्याप्तिः साध्यवद्भिन्ने घटे वर्तमा
नस्य साध्याभावस्य घटाकाशसंयोगान्यतरस्वरूपस्य गगनेऽपि सत्त्वात्तत्र च हेतोर्वृत्तेः। नच साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववत्त्वं विव।
क्षितमिति वाच्यम्। साध्याभावपदवैयर्थ्यापत्तेः साध्यवद्भिन्नवृत्तित्वविशिष्टवद्वृत्तित्वस्यैव सम्यक्त्वादिति चेन्न अभावाभावस्यातिरिक्त
त्वमतेनैतल्लक्षणकरणात् तथा चाधिकरणभेदेनाभावभेदात् साध्यवद्भिन्ने घटे वर्तमानस्य साध्याभावस्य प्रतियोगिव्यधिकरणस्य प्रतियोगिमति
गगनेऽसत्त्वादव्याप्तेरभावात्। नन्वेवं साध्याभावेत्यत्र साध्यपदवैयर्थ्यं अभावाभावस्यातिरिक्तत्वेन द्रव्यत्वादेरभावाभावत्वात् साध्यवद्भिन्न
वृत्तिघटाभावादेस्तु हेतुमत्यसत्त्वादधिकरणभेदेनाभावभेदादिति वाच्यम्। यत्र प्रतियोगिसमानाधिकरणत्वप्रतियोगिव्यधिकरणत्वलक्ष
णविरुद्धधर्माध्यासस्तत्रैवाधिकरणभेदेनाभावभेदाभ्युपगमो नतु सर्वत्र तथा च साध्यवद्भिन्नवृत्तिघटाभावादेर्हेतुमत्यपि सत्त्वादसम्भव।
वारणाय साध्यपदोपादानात्। यद्वा घटत्वघटाकाशसंयोगान्यतराभावाभावोऽतिरिक्तः घटाकाशसंयोगघटत्वादीनामननुगततया तथात्व
स्यवक्तुमशक्यत्वात् घटत्वद्रव्यत्वाद्यभावाभावस्तु नातिरिक्तः घटत्वद्रव्यत्वादीनामप्यनुगतत्वात्। तथा च द्रव्यत्वादिकमादायासम्भववार
णायैव साध्यपदमित्यन्यत्र विस्तरः॥

सिं· ७

नाधिकरणसाध्यकेवन्हिमान्धूमादित्यादावव्याप्तिश्चेत्यपिबोध्यम् इतिव्याप्तिपंचकरहस्यम्॥समाप्तोऽयंव्याप्तिपंचकग्रंथः॥माथुरीपंचलक्षणीस
माप्ता॥ ॥अथसिंहव्याघ्रचिंतामणिः॥श्रीगणेशायनमः नापिसाध्यासामानाधिकरण्यानधिकरणत्वंसाध्यवैयधिकरण्यानधिकरणत्वंवा नतु
भयमपिसाध्यानधिकरणानधिकरणत्वंनञ्चतत्रयत्किंचित्साध्यानधिकरणानधिकरणेधूमेचाप्रसिद्धमिति॥नापीति॥अत्रसाध्यस्यासामानाधि
करण्यंनसाध्याधिकरणावृत्तित्वाभावः द्रव्यंसत्वादित्यादावतिव्याप्त्यापत्तेः द्रव्यत्वाधिकरणावृत्तित्वाभावादनधिकरणत्वात् सत्तायांनापिसाध्यव
द्भिन्नवृत्तित्वं द्वितीयेनपुनरुक्त्यापत्तेः किंतुसाध्याधिकरणत्वाभाववद्वृत्तित्वंतदनधिकरणत्वंचतद्भिन्नत्वं अधिकरणत्वप्रवेशेप्रयोजनविरहा
त् तथाचसाध्याधिकरणत्वाभाववद्वृत्तिभिन्नत्वहेतोरव्यभिचरितत्वमितिफलितं अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिवारणायाधिकरणत्व
प्रवेशः अव्याप्यवृत्तेरधिकरणतानुनाव्याप्यवृत्तिःसाध्याधिकरणत्वं चसाध्यतावच्छेदकावच्छिन्नंसाध्यतावच्छेदकसंबंधावच्छिन्नंचग्रा
ह्यं अन्यथागुणकर्मान्यत्वविशिष्टसत्तावान्जातेरित्यादौसत्तायाएवसाध्यत्वेनसाध्यकरणत्वाभाववत्सामान्यादेवतद्वृत्तित्वाज्जातेरितिव्याप्ति
स्यात्स्याच्चसमवायेनवन्ह्यादौसाध्येसंयोगेनधूमादिहेतावतिव्याप्तिः वन्ह्यधिकरणत्वाभाववज्जलहृदादेवतद्वृत्तित्वाद्धूमादेः इत्यचसाध्यता
वच्छेदकविशिष्टसत्तात्वावच्छिन्नसाध्याधिकरणत्वाभाववद्गुणादितद्वृत्तित्वाज्जातेःसाध्यतावच्छेदकसमवायसंबन्धावच्छिन्नवन्ह्य धिक
रणत्वाभाववत्पर्वतादावपिधूमस्यतद्वृत्तित्वान्नातिव्याप्तिः वृत्तिश्चहेतुतावच्छेदकसंबन्धेनबोध्यातेनतादृशवन्ह्यधिकरणत्वाभाववत्तिधूमावय
वेसमवायेनधूमस्यवृत्तावपिनक्षतिः नन्वेवंसात्तावानद्रव्यत्वादित्यादावव्याप्तिः सत्ताधिकरणत्वाभाववतिसामान्यादौहेतुतावच्छेदकसम राम: ७
वायसंबन्धेनवृत्तेरेवाप्रसिद्धेरितिवाच्यम् तादृशसाध्याधिकरणत्वाभावव्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वमितिविवक्षितत्वात्

साध्याधिकरणत्वाभावसामानाधिकरणोन्युक्तौ धूमवान्वन्हेरित्यादौ धूमाधिकरणानाभाववति जलह्रदादौ वन्हिमदन्योन्याभावसत्वादतिव्या-
प्तिरतो व्यापकत्वानुधावनं अन्योन्याभावप्रतियोगितावच्छेदकत्वं हेतुतावच्छेदकसंबंधावच्छिन्नं हेतुतावच्छेदकावच्छिन्नं च ग्राह्यं अन्य-
था वन्हिमान्धूमादित्यादौ वन्ह्यधिकरणत्वाभाववति धूमावयवे धूमवदन्योन्याभावासत्वादव्याप्तिः स्यात्। स्याच्च द्रव्यं जातेरित्यादौ घटत्वपटत्वा-
दिनत्तज्जातिमतोन्योन्याभाववत्सद्द्रव्यत्वाधिकरणत्वाभावव्यापकत्वेऽनातिव्याप्तिः अव्याप्यवृत्तिमतोन्योन्याभाववस्तुनाव्याप्यवृत्तिरिति पृथि-
वीसंयोगादित्याद्यव्याप्यवृत्तिहेतुकेव्यभिचारिणानातिव्याप्तिरिति संक्षेपः इति प्रथमलक्षणमासं॥ साध्यवैयधिकरण्यमिति साध्यवैयधि-
करण्यं साध्यवद्भिन्नवृत्तित्वं साध्यवदवृत्तित्वपरत्वे द्रव्यं सत्वादित्यादावतिव्याप्तिः अव्याप्यवृत्तिमतोन्योन्याभाववस्तुनाव्याप्यवृत्तिरित्यव्याप्यवृ-
त्तिसाध्यकहेतौ नाव्याप्तिः अनधिकरणत्वमित्यत्राधिकरणत्वांशस्याधिकस्य प्रवेशान्न साध्यवदन्यावृत्तित्वमित्यनेन यथाश्रुतस्य पौनरुक्त्यं
अखंडाभावघटकतयाचाधिकरणत्वांशस्य न वैयर्थ्यं साध्यवद्भिन्नत्वं च साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रति-
योगितावच्छेदकताकं बोध्यम् तेन वन्हिमान्धूमादित्यादौ धूमस्य समवायेन वन्हिमतो भिन्ने यत्किंचित्साध्यवद्व्यक्तिभिन्ने च पर्वतादौ वृत्तित्वेपि
नक्षतिः तादृशसाध्यवद्भिन्नत्वव्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वमिति तु समुदायार्थनिष्कर्षः अन्यथा पूर्ववत्साध्यवद्भिन्नवृत्तिक-
त्वमित्यत्र वृत्ते हेतुतावच्छेदकसम्बन्धेनैव वाच्यतया सत्तावान्द्रव्यत्वादित्यादावव्याप्त्यापत्तेः शेषं पूर्ववत् लक्षणद्वयमेकदैव दूषयति। नतुभय-
मपीति। साध्यानधिकरणानधिकरणत्वं साध्यानधिकरणानधिकरणत्वनियतं साध्यानधिकरणावृत्तित्वव्याप्यमिति यावत् न च व्यापकीभूतंसा-
ध्यानधिकरणावृत्तित्वं च नत्र केवलान्वयि साध्यकेऽप्रसिद्धमित्यन्वयः साध्यानधिकरणत्वस्य साध्याधिकरणत्वावच्छिन्नप्रतियोगिताकभेदव-

सि· त्वस्यतत्राप्रसिद्धेः यत्किंचिदितियदिचसाध्यानधिकरणत्वंतत्तत्सामान्यभेदः किंतुसाध्याधिकरणप्रतियोगिताकभेदवत्त्वमात्रं तदावह्निमान्
८ धूमादित्यत्रयत्किंचिद्वह्न्यनधिकरणेपर्वतादौवर्तमानेधूमेप्यप्रसिद्धमित्यर्थः अप्यर्थकचकारात्केवलान्वयिसाध्यकसमुच्चयः। तथाचव्यापका
भावाद्याप्यीभूतंतदुभयलक्षणमपितदुभयत्राप्रसिद्धमितिभावः साध्यानधिकरणानधिकरणत्वमितियथाश्रुतंतुनसंगच्छतेयथोक्त
लक्षणद्वयस्यतत्स्वरूपत्वाभावादितिध्येयम् भट्टाचार्यानुयायिनस्तुतदुभयमपि तदुभयलक्षणवाक्यमपिसाध्यानधिकरणानधिकर
णत्वं साध्यानधिकरणानधिकरणत्वबोधजनकं साध्याधिकरणत्वसामान्याभाववद्वृत्तित्वाभावसाध्यवत् सामान्यभिन्नवृत्तित्वाभावान्य
तरबोधजनकमितियावत्। तच्चतादृशान्यतराभाववत्त्वंचतत्रकेवलान्वयिसाध्यकेऽप्रसिद्धमित्यन्वयः साध्याधिकरणत्वसामान्याभावादेरप्र
सिद्धत्वादितिभावः। ननुतदुभयवाक्यंनमाशुक्ताभावान्यतरविषयबोधजनकमपिसाध्याधिकरणत्वप्रतियोगिकाभाववद्वृत्तित्वसामान्या राम·
भावसाध्यवत् प्रतियोगिकभेदवृत्तित्वसामान्याभावन्यतरबोधजनकमेव साध्याधिकरणत्वप्रतियोगिकाभावसाध्यवत्प्रतियोगि ८
कभेदौचकेवलान्वयिन्यपिप्रसिद्धावित्यतआह। यत्किंचिदिति। शेषंपूर्ववदित्याहुः॥ इतिशशिधरमणिधरलक्षणव्याख्या॥
॥ समाप्तौसिंहव्याघ्रौ॥ ॥ ९

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 25422
Date 9.8.68
SIMLA.

गित्वाभावश्चेतादृशवृत्तित्वसामान्याभावो वोध्यः तेन न धूमवान्वन्हेरित्यादौ धूमवदन्यजलह्रदादिवृत्तित्वाभावस्य धूमवदन्यवृत्तित्वजलत्वो
याभावस्य च हेतौ सत्वेपि नातिव्याप्तिः साध्यवदन्यत्वं चान्योन्याभावत्वनिरूपितसाध्यवत्वावच्छिन्नप्रतियोगिताकाभाववत्वं तेन वन्हिमान्
मादित्यादौ न तत्र वन्हिमदन्यस्मिन् धूमादेर्वृत्तावपि नाव्याप्तिर्नवा वन्हिमत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य स्वावच्छिन्नभिन्नभेदरू
स्याधिकरणे पर्वतादौ धूमस्य वृत्तावप्यव्याप्तिः तस्याः साध्यवत्वावच्छिन्नप्रतियोगिताऽत्यन्ताभावत्वनिरूपितत्वेनान्योन्याभावत्वनिरूपि
तत्वविरहात् अन्योन्याभावनिरूपितत्वं च तादात्म्यसंवंधावच्छिन्नत्वमेव साध्यवत्वं च साध्यतावच्छेदकसंवंधेन वोध्यम् तेन वन्हिमान्धूमा
त्यादौ वन्हिमत्वावच्छिन्नप्रतियोगिताकस्य समवायेन वन्हिमतोऽन्योन्याभावस्याधिकरणे पर्वतादौ धूमादेर्वृत्तावपि नाव्याप्तिः सर्वम् अन्यत्र प्रथम
लक्षणोक्तदिशावसेयम् यथा च न तृतीयलक्षणाभेदस्तथोक्तं तत्रैवेति समासः सर्वाण्येव लक्षणानि केवलान्वय्यव्याप्त्या दूषयति केवलान्वय्य
वादिति पंचानामेव लक्षणानामिदं वाच्यं ज्ञेयत्वादित्यादिव्याप्यवृत्तिकेवलान्वयिसाध्यके द्वितीयादिलक्षणचतुष्टयस्य तु कपिसंयोगाभाववा
न्त्वादित्याद्यव्याप्यवृत्तिकेवलान्वयिसाध्यकेपि चाभावादित्यर्थः साध्यतावच्छेदकसंवंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिता
साध्याभावस्य साध्यतावच्छेदकसंवंधेन साध्यवत्वावच्छिन्नप्रतियोगिकान्योन्याभावस्य चाप्रसिद्धत्वात् कपिसंयोगाभाववान् सत्वादित्यादौ
रवच्छिन्नसाध्याभाववत्वस्याप्रसिद्धत्वादिति भावः तृतीय ~ लक्षणस्य केवलान्वयिसाध्यकासत्वं च तद्व्याख्यानावसर एव प्रपंचितं एतच्चोप
क्षणं द्वितीये कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः अधिकरणभेदेनाभावभेदे मानाभावेन कपिसंयोगवद्भिन्नवृत्तिकपिसंयोगाभावो द्रव्यवृ
कपिसंयोगाभाव एव तद्वृत्तित्वादेन वृक्षत्वस्य तृतीये साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्य घटकत्वं चालनीन्यायेनान्योन्याभावमादाय ना